यावत् रघु० । पश्वभावे स्थालीपाकेन कार्य्यं "अपि वा स्थालीपाकं कुर्व्वीतेति" गोभिलः । एतद्विधानन्तु "स्थालीपाकं पशुस्थाने कुर्य्यात् यद्यानुकल्पिकम् । श्रपयेत्तं सवत्सायास्तरुण्या गोः पयस्तु" छन्दोगपरिशि० । अन्विति ओदनचरोः पश्चात् । अत एव । "पितरः स्पृहयन्त्यन्नमष्टकासु मघासु च । तस्माद्द्यात् सदोद्युक्तो विद्वत्सु ब्राह्मणेषु च" शाता० । तस्मादन्नं प्रधानं यूपादिकन्तूपकरणत्वेन शक्तानामावश्यकं, सदेति श्रवणात् । "अमावस्याष्टका वृद्धिः कृष्णपक्षेऽयनद्वयम्" । "पौषमासस्य रोहिण्यामष्टकायामथापि वा" या०स्मृ० । अत्रायं भेदः हेमन्तशिशिरयोश्चतुर्णामपरपक्षाणामष्टमीष्वष्टका एकस्यां वा" आश्व०सू० उक्तेः समर्थासमर्थभेदेन चतुर्षु मासेषु कृष्णाष्टमीषु एकस्यां वा अष्टका कार्य्येति । आग्रहायण्या ऊर्द्ध्वं तिसृष्वष्टकासु" स्मृतन्तरात्तथात्वम् । अन्वष्टकाशब्दे विवृतमेतत् । अष्टपरिमाणमस्याः कन् । अजादिपाठात् टाप् पितृदैवत्ये इति अस्य प्रायिकत्वात् क्षिपका०नेत्त्वम् । ४अष्टमीतिथिमात्रे "अमावास्या गुरुं हन्ति शिष्यं हन्ति चतुर्द्दशी । ब्रह्माष्टका पौर्णमास्यौ तस्मात्ताः परिवर्ज्जयेत्" मनुः एतद्भिन्नाया स्त्रियामष्टिका अत इत्वम् ।

**अष्टकाङ्ग** पु० अष्टकमङ्गं यस्य । नयपीठे त्रिका० तानि चाङ्गानि स्वाम्यमात्यसुहृत्कोषराष्ट्रदुर्गबलानि च । राज्याङ्गानि प्रकृतयः पौराणां श्रेणयोऽपि चेत्युक्तानि अङ्गानि

**अष्टकिक** त्रि० अष्टकाऽस्यस्य ब्रीह्या० ठन् । अष्टकायुक्ते अत्र वा इनि अष्टकी । अत्र वार्थे त्रि० स्त्रियां ङीप् ।

**अष्टकृत्वस्** अव्य० अष्टन्+क्रियाभ्यावृत्तौ कृत्वसुच् । अष्टधाभ्यावृत्तक्रियायाम् ।

**अष्टकोण** त्रि० अष्टौ कोणा अस्य । १अष्टकोणयुक्तक्षेत्रे तन्त्रोक्ते २यन्त्रभेदे च "बिन्दुत्रिकोणवसुकोणदशारयुग्ममिति" तन्त्रम् "३कुण्डभेदे अष्टकोणमथैशान्यामत्यन्तं च भयप्रदम्" हेमा०व्र०ख०कुण्डप्र० । [क्रीते ।

**अष्टक्य** त्रि० अष्टकेन क्रीतः गवा० यत् । अष्टसंख्यान्वितेन

**अष्टगव** न० अष्टानां गवां समाहारः योगवि०अच् । गवाष्टके तद्युक्ते शकटे तु अष्टागवमित्येव । "अष्टागवं धर्म्महलमिति" स्मृतिः ।

**अष्टगुण** त्रि० अष्टभिर्गुण्यते गुण–अभ्यासे कर्म्मणि क । अष्टभिर्गुणिते अष्टावृत्ते । "मिथ्यावादी च संस्थाने दाप्योऽष्टगुणमत्ययम्" मनुः । "दद्यावष्टगुणैश्वर्य्यं तेषां तुष्टस्तु केशवः" भा०व०प्र० ८२ अध्या० "ततश्चाष्टगुणं पार्थ ! प्राप्नुयाद्धर्म्ममुत्तमम्" ८५ अध्या० । अष्टौ गुणा यस्य अष्टविधगुणयुक्ते २ब्राह्मणे ते च गुणा गौतमेनोक्ताः यथा अथाष्टावात्मगुणा दया सर्व्वभूतेषु क्षान्तिरनसूया शौचमनायासो मङ्गलमकार्पण्यमस्पृहेति । यस्यैते न चत्वारिंशत् संस्काराः न वाष्टावात्मगुणाः न स ब्राह्मणः" । अष्टावृत्तो गुणोऽस्य वृत्तौ अष्टशब्दस्य तदावृत्तपरता । ३अष्टावृत्तगुणके पदार्थे "अन्नादष्टगुणं चूर्णं चूर्णादष्टगुणं पयः । पयसोऽष्टगुणं मांसं मांसादष्टगुणं घृतम् । घृतादष्टगुणं तैलं मर्द्दयेन्न तु खादयेत्" वैद्यकम् ।

**अष्टगृहीत** त्रि० अष्टकृत्वो गृहीतः वृत्तौ सुजर्थौलुप्तः । अष्टवारगृहीते "रसमाज्यं मांसं पायसमिति संयूयाष्टगृहीतं गृहीत्वा जुहूयात्" गोभि० अष्टगृहीतं केवलमेवस्रुवेणाष्टवारान् गृहीतम्" स०त० रघुनन्दनः ।

**अष्ट(ष्टा)चत्वारिंशत्** स्त्री अष्टाधिका चत्वारिंशत् शा०त० आत्मम् । (आटचल्लिश) १संख्यायां २तत्संख्येये च । "अष्टचत्वारिंशत्संस्कारैः संस्कृत" इति मिताक्ष० गौत० । तत्र गौतमेन चत्वारिंशदेव संस्काराः अष्टौ गुणाश्च ब्राह्मण्यहेतवो दर्शिताः चत्वारिंशत् संस्काराः गुणसहिता अष्टचत्वारिंशदित्येके । ते च "गर्भाधानपुंसवनसीमन्तोन्नयनजातकर्म्मनामकरणान्नप्राशनचौड़ोपनयनम् । चत्वारि वेदव्रतानि स्नानं सहधर्मचारिणीसंयोगः पञ्चानां यज्ञानामनुष्ठानं देवपितृमनुष्यभूतब्रह्मणामितेषाञ्चाष्टकान्वकापार्व्वणश्राद्धश्रावण्याग्रहायणीचैत्र्याश्वयुजीति सप्त पाकयज्ञसंस्था, अग्न्याधेयमग्निहोत्रदर्शपौर्णमासावग्रयणं चातुर्मास्यनिरूढ़पशुबन्धसौत्रामणीति सप्त हविर्यज्ञसंस्था अग्निष्टोमोऽत्यग्निष्टोम उक्थः षोड़शी वाजपेयोऽतिरात्रोऽप्तोर्य्याम इति सप्त सोमसंस्था इत्येते चत्वारिंशत् संस्काराः । अथाष्टावात्मगुणा दया सर्व्वभूतेषु क्षान्तिरनसूया शौचमनायासोमङ्गलमकार्पण्यमस्पृहेति यस्यैते न चत्वारिंशत् संस्कारा नवाष्टावात्मगुणा न स ब्राह्मणः सायुज्यं सालोक्यञ्च गच्छति । यस्य तु खलु संस्काराणामेकदेशोऽप्यष्टावात्मगुणा अथ स ब्राह्मणः सायुज्यं सालोक्यञ्च गच्छति अधिकं संस्कारशब्दे वक्ष्यते" गौ० संहितायां तु चत्वारिंशत्संस्कारैः संस्कृत इत्येव पाठः । मिताक्षराकृत पाठस्तु उक्तरीत्या समर्थितः ।

**अष्टतय** त्रि० अष्टाववयवा अस्य अष्टन्+तयप् । अष्टावयवे । "टिड्ढाणञिति" पा०सूत्रे तयपोग्रहणात् स्त्रियां ङीप् ।